# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ६ | गुणाः – ५० |
| विषयः – नव्यन्यायः | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – अवयवः | |

सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।** १०

१ हेतुनिरूपणे सङ्गतिः।

२ पञ्चम्यन्तहेतुप्रयोजनम्।

३ अनुमितीत्यादिजनकान्तस्य प्रयोजनम्।

**प्रश्नः २ 'अनुमितिकारणीभूते'ति हेतुलक्षणं प्रतिपादयत।**

**प्रश्नः ३ हेतुविभक्तिमत्त्वनिवेशस्य प्रयोजनं यथागदाधरि निरूपयत।**

**प्रश्नः ४ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**

१ विभक्त्यर्थसार्थक्यम्।

२ हेतुपञ्चम्याः ज्ञापकत्वार्थः।

३ वृक्षादपैति पततीत्यादौलाघवाद्विभागे शक्तिरिति पङ्क्तर्थः।

**प्रश्नः ५ हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैवेति दिधितिं विशदयत।**

**प्रश्नः ६ 'उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वम्' विवृणुत।**

**प्रश्नः ७ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**

१ न्यायाङ्गानां परिचयः।

२ पञ्चावयवपरिचयः।

३ पञ्चम्याः ज्ञानज्ञाप्यत्वे लक्षणा।

**प्रश्नः ८ पञ्चम्यन्तेति लाक्षणिकं विशेषणमिति दिधितिं व्याख्यात।**

**प्रश्नः ९ वह्निमानित्यादौ हेत्वन्वयानुरोधात् ज्ञानलक्षणेति यत्तुमतं विशदयत।**

**प्रश्नः १०  निम्नलिखितेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखत।**

१ नवीनानां मते हेतुपञ्चम्याः कोऽर्थः?

२ अयमात्मा ज्ञानादित्यादौ ज्ञानपदं मुख्यार्थं गौणार्थं वा?

३ गगनं न परमाणुपरिमाणमित्यादौ कः दोषः?

४ पर्वतो वह्निमानित्यत्र निगमनवाक्यस्याकारःकः?

५ पञ्चावयववाक्यं किमुच्यते?

६ धुमाद्वह्निमान् आलोकादित्यत्र उपनयनस्याकारः कः?

७ का नाम सिषाधयिषा?

८ द्वितीयहेतुलक्षणं किम्?

९ साध्यविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वमिति कतमं लक्षणम्?

१० घटो दण्डात्, वह्निर्धूमात् इत्यादयः प्रतिज्ञाः न वा?

११ हेतुत्वं प्रमेयं हेतुत्वादित्यत्र हेतुः कः?

१२ नव्यन्यायप्रवर्तकः आचार्यः कः?

१३ अवयवग्रन्थे हेतोः कति लक्षणानि प्रतिपादितानि?

१४ मणिकारोक्तं हेतुलक्षणं किम्?

१५ हेतुविभक्तिमदिति कस्य प्रयोजनम्?

****